# A-II/1/2395/23

## चतुर्थसत्रार्द्धम्

## प्रथमपत्रम्

## बौद्धदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**क. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. तत्त्वसंग्रहे शब्दार्थपरीक्षायां कति कारिकाः सन्ति?
2. तत्त्वसंग्रहे कति परिच्छेदाः सन्ति?
3. शब्दार्थपरीक्षायां शब्दस्य अर्थेनसह परमार्थसम्बन्धः स्वीकृतः अस्वीकृतो वा? उत्तरत।
4. प्रत्यक्षप्रमाणस्य विषयः कः? पाठ्यग्रन्थदिशा सूचयत।
5. प्रत्यक्षप्रमाणं कतिविधम्? बौद्धनयदिशा उत्तरत।
6. अपोहः कः?
7. अपोहः अर्थरूपः अतद्व्यावृत्तिरूपो वा? तत्त्वसंग्रहदिशा उत्तरत।
8. वैशेषिकानां सामान्यपदार्थः बौद्धनये स्वीकृतः अस्वीकृतो वा?
9. सामान्यलक्षणं किम्?
10. सत्यं कतिविधम्? नामानि लिखत।
11. आर्यसत्यं कतिविधम्? नामोल्लेखं कुरुत।

**अथवा**

सामान्यपदार्थस्य लक्षणं स्पष्टीकुरुत।

12. गोत्वाभावे गावः सिध्यति न वा? तत्त्वसंग्रहदिशा सूचयत।

**अथवा**

अपोहः अतद्व्यावृत्तिरूपः तदव्यावृत्तिरूपो वा? स्पष्टीकुरुत।

13. शब्दस्य श्रुतिमात्रत्वात् शब्दाः अर्थान् स्पृशन्ति न वा? बौद्धदिशा लिखत।

**अथवा**

शब्दः नित्यः अनित्यो वा? तत्त्वसंग्रहदिशा उत्तरत।

14. अपोहः कतिविधः?

**अथवा**

तत्त्वसंग्रहस्य रचनाकारः कः अस्ति?

15. अनुमानं कतिविधम्? नामानि लिखत।

**अथवा**

तत्त्वसंग्रहस्य रचना कस्यां शताब्द्यां जाता?

**ख. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. स्वस्मृत्या पाठ्यग्रन्थात् कारिकामेकां विलिख्य स्वसंकृतगिरा तस्याः विवृत्तिं कुरुत या प्रश्नपत्रेऽत्र नागता स्यात्।

17. सप्रसङ्गं व्याख्येयम्–

यथासंकेतमेवातोऽसंकीर्णार्थाभिधायिनः।

शब्दा विवेकतो वृत्ताः पर्याया न भवन्ति नः॥

18. प्रसङ्गपूर्वकं स्वसंस्कृतगिरा व्याख्यायताम् –

तासां हि बाह्यरूपत्वं कल्पितं तन्न वास्तवम्।

भेदाभेदौ च तत्त्वेन वस्तुन्येव व्यवस्थितौ॥

**अथवा**

भेदाभेदादयः सर्वे वस्तुसत्परिनिष्ठताः।

निःस्वभावश्च शब्दार्थस्तस्मादेते निरास्पदाः॥

19. सप्रसङ्गं व्याख्यायत –

अतद्रूपपरावृत्तं वस्तुमात्रं स्वलक्षणम्।

यत्नेन क्रियमाणोऽयं अन्वयो न विरुध्यते॥

**अथवा**

अभिप्रेते निवेशार्थं बुद्धे शब्दः प्रयुज्यते।

अनभीष्टव्युदासोऽतः सामर्थ्येनैव सिध्यति॥

20. ससन्दर्भं व्याख्यायत –

अगोभिन्नं च यद्वस्तु तदक्षैर्व्यवसीयते।

प्रतिबिम्बं तदध्यस्तं स्वसंवित्त्याऽवगम्यते॥

**अथवा**

अभावो निरुपाख्यत्वं तुच्छतेति यदुच्यते।

तत्र स्थित्यादिसम्बन्धः कोऽसत्सु परिकल्प्यते॥

**ग. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. आचार्यशान्तिरक्षितस्य बौद्धदर्शनसम्प्रदायनिरूपणपूर्वकं व्यक्तित्वं कृतित्वं चाभिलक्ष्य निबन्धमेकं विशदीकुरुत।

**अथवा**

तत्त्वसंग्रहस्य बौद्धदर्शनपरम्परायाम् अवदानं प्रस्तुतीकुरुत।

# A-II/2/2396/23

## चतुर्थसत्रार्द्धम्

## द्वितीयपत्रम्

## बौद्धदर्शनम्

**समय: घण्टात्रयम्** **पूर्णाङ्का: 80**

**क. सर्वे अतिलघूत्तरीया: प्रश्ना: समाधेया:।** **(15×2=30)**

1. 'प्रमाणवार्तिकम्' कस्य ग्रन्थस्य वार्तिकम्? क: तस्य प्रणेता?
2. प्रमाणवार्तिके कति परिच्छेदा: सम्प्रति उपलभ्यन्ते?
3. प्रमाणवार्तिककारस्य अन्ये ग्रन्था: कति? द्वयस्य नामोल्लेखं कुरुत।
4. प्रमाणवार्तिके कति कारिका: सन्ति प्रत्यखपरिच्छेदे?
5. प्रत्यक्षप्रमाणस्य लक्षणं बौद्धदिशा लिखत।
6. अनुमानं किम्? पाठ्यग्रन्थदिशा सूचयत।
7. प्रत्यक्षप्रमाणस्य भेदा: कति? बौद्धदिशा नामानि लिखत।
8. योगिप्रत्यक्षं किम्? धर्मकीर्तिदिशा लिखत।

**अथवा**

तत्त्वसंग्रहे कति प्रमाणानि स्वीकृतानि?

9. मनोविज्ञानं प्रत्यक्षं अनुमानं वा? सूचयत।
10. सामान्यं किम्? बौद्धा: सामान्यपदार्थं स्वीकुर्वन्ति न वा?
11. प्रत्यक्षप्रमाणस्य विषय: क:?
12. बौद्धनये अनुमानं कतिविधम्? नामानि लिखत।

**अथवा**

सौत्तान्तिकमतानुसारं ज्ञानस्य द्वैविध्यं किम्? प्रमाणवार्तिकदिशा नामोल्लेखं कुरुत।

13. विपर्यय: क:? धर्मकीर्तिदिशा सूचयत।

**अथवा**

बौद्धनये आत्मानुभूति: स्वीक्रियते न वा? पाठ्यग्रन्थदिशा लिखत।

14. प्रमाणफल-प्रमाणयो: मध्ये भेद: अभेदो वा ? बौद्धदिशा लिखत।

**अथवा**

प्रमाणवार्तिके स्वसंवित्ते: सिद्धि: असिद्धिर्वा ?

15. भ्रान्त्या विपर्ययेन च प्रत्यक्षे बाध: जायते अनुभावे वा ? लिखत।

**अथवा**

प्रमाणवर्तिकस्य रचना कस्यां शताब्द्यां जाता ?

**ख. सर्वे लघूत्तरीया: प्रश्ना: समाधेया:।** **(5×6=30)**

16. स्वपाठ्यग्रन्थात् कारिकामेकां विलिख्य स्वसंस्कृतगिरा तस्या: विवृतिं कुरुत, या प्रश्नपत्रेऽस्मिन् नागता स्यात्।

17. सप्रसङ्गं व्याख्येयम् –

अर्थक्रियासमर्थं यत् तदत्र परमार्थसत्।<br>
अन्यत् संवृतिसत् प्रोक्तं ते स्व-सामान्यलक्षणे॥

**अथवा**

आत्मानुभूतं प्रत्यक्षं नानुभूतं परै: यदि।<br>
आत्मानुभूति: सा सिद्धा कुतो येनैवमुच्यते॥

18. प्रसंगपूर्वकं व्याख्यायताम् –

मानं द्विविधं विषयद्वैविध्यात् शक्त्यशक्तित:।<br>
अर्थक्रियायाम् केशादिनार्थोऽनर्थाधिमोक्षत:॥

**अथवा**

त्रिविधं कल्पनाज्ञानं आश्रयोपप्लवोद्भवम्।<br>
अविकल्पमेकं च प्रत्यक्षाभं चतुर्विधम्॥

19. यथामत्या प्रसङ्गपूर्वकं विवेचनीयम् –

पूर्वानुभूतग्रहणे मानसस्याप्रमाणता।<br>
अदृष्टग्रहणेऽन्यादेरपि स्यादर्थदर्शनम्॥

**अथवा**

अशक्तं सर्वमिति चेद् बीजादेरङ्कुरादिषु।<br>
दृष्टा शक्ति:, मता सा चेत् संवृत्याऽस्तु यथा तथा॥

20. सप्रसङ्गं निरूपणीयम् –

सामान्यग्रहणाच्छब्दादप्रसङ्गो मतो यदि।

तन्न केवलसामान्याग्रहणाद् ग्रहणेऽपि वा॥

**ग. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. आचार्यधर्मकीर्ते बौद्धन्यायपरम्परायामवदानं अभिलक्ष्य निबन्धमेकं उपनिबद्धकुरुत।

**अथवा**

पाठ्यग्रन्थस्य पाठ्यांशस्य सारं लिखत।

# A-II/3/2397/23

## चतुर्थसत्रार्द्धम्

## तृतीयपत्रम्

## बौद्धदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**क. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. माध्यमिकदर्शनस्य प्रवर्तकः कः?
2. पाठ्यग्रन्थस्य द्वाविंशतितमस्य प्रकरणस्य नाम किम्?
3. स्कन्धाः के? नामानि लिखत।
4. आर्यसत्यानि कानि? नामानि लिखत।
5. को नाम पूर्वन्तः? पाठ्यग्रन्थदिशा सूचयत।

**अथवा**

रत्नत्रयं लेखनीयम्।

6. भगवता बुद्धेन कति अव्याकृतवस्तूनि निर्दिष्टानि?
7. द्वे आवरणे के? पाठ्यग्रन्थदिशा लिखत।

**अथवा**

पुरुषपुद्गलानि कति? पाठ्यग्रन्थदिशा लिखत।

8. माध्यमिककारिकायाः सप्तविंशतितमस्य परिच्छेदस्य नाम किम्? कति च कारिकाः परिच्छेदेऽस्मिन्?
9. सौगताः आत्मवादिनो नैरात्मवादिनो वा?
10. 'सर्वदृष्टिप्रहाणाय' इत्यस्य आशयः कः?
11. नैरात्मयद्वयं लिखत।
12. सौगतदर्शनप्रस्थानानि कति? नामानि लिखत।
13. शून्यता का?

**अथवा**

सकृदगामिफलं किम्? पाठ्यग्रन्थदिशा लिखत।

14. तथागतपदस्य कोऽभिप्रायः ?

**अथवा**

सत्यद्वयं किम् ? पाठ्यग्रन्थदिशा सूचयत।

15. प्रसन्नपदटीकाकारः कः ?

**अथवा**

माध्यमिककारिकायाः रचना कस्यां शताब्द्यां जाता।

**ख. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. पाठ्यग्रन्थस्य स्वस्मृत्या कारिकामेकां विलिख्य व्याख्या कार्या। सा कारिका प्रश्नपत्रेऽस्मिन् नागता स्यात्।

17. ससन्दर्भव्याख्या विधेया –

एवं शून्यमुपादानमुपादाता च सर्वशः।
प्रज्ञप्यते च शून्यत्वं कथं शून्यस्तथागतः।

**अथवा**

तथागतो यत्स्वभावस्तत्स्वभावमिदं जगत्।
तथागतो निःस्वभावो निःस्वभावमिदं जगत्॥

18. सप्रसङ्गं व्याख्येयम् –

यः प्रतीत्यसमुत्पादः शून्यतां तां प्रचक्ष्महे।
सा प्रज्ञप्तिरुपादाय प्रतिपत्सैव मध्यमा॥

**अथवा**

यदि शून्यमिदं सर्वमुदयो नास्ति न व्ययः।
चतुर्णामार्यसत्यानामभावस्ते प्रसज्यते॥

19. यथाग्रन्थं विवेचयत –

अन्तवान् यदि लोकः स्यात्परलोकः कथं भवेत्।
अथाप्यनन्तवाँल्लोकः परलोकः कथं भवेत्॥

**अथवा**

शून्यमिति न वक्तव्यमशून्यमिति वा भवेत्।
उभयं नोभयं चेति प्रज्ञप्त्यार्थं तु कथ्यते॥

20. प्रसङ्गपूर्वकं व्याख्यायताम् –

प्रपञ्चयन्ति ये बुद्धं प्रपञ्चातीतमव्ययम्।

ते प्रपञ्चहताः सर्वे न पश्यन्ति तथागतम्॥

**ग. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. पाठ्यग्रन्थस्य तथागतपरीक्षाप्रकरणस्य सारं लिखत।

**अथवा**

आचार्यनागार्जुनस्य व्यक्तित्वं कृतित्वञ्चाभिलक्ष्य निबन्धमेकं लिखत।

# A-II/4/2398/23

## चतुर्थसत्रार्द्धम्

## चतुर्थपत्रम्

## बौद्धदर्शनम्

**समय: घण्टात्रयम्** **पूर्णाङ्का: 80**

**क. सर्वे अतिलघूत्तरीया: प्रश्ना: समाधेया:।** **(15×2=30)**

1. बोधिचर्यावतारस्य पञ्जिकाकार: क:?
2. बोधिचर्यावतारस्य नवमपरिच्छेदे कति कारिका: सन्ति?
3. स्वस्मृत्या पाठ्यग्रन्थात् कारिकामेकां लिखत, या प्रश्नपत्रेऽस्मिन् नागता स्यात्।
4. कति पारमिता:? पाठ्यग्रन्थदिशा सूचयत।

**अथवा**

वेदनाया: परमार्थत: सत्ता माध्यमिकनये स्वीक्रियते न वा? पाठ्यग्रन्थदिशा सूचयत।

5. पारमितानां नामानि लिखत।
6. कर्मफलसम्बन्ध: बौद्धमते स्वीक्रियते न वा?

**अथवा**

प्राकृतको लोक: केन लोकेन बाध्यते?

7. शान्तिदेवस्य अन्यदपि सम्बोधनम् उपलभ्यते? तं लिखत।
8. सत्यं कतिविधम्? माध्यमिकदिशा नामानि लिखत।

**अथवा**

संवृति: कतिविधा? नामानि लिखत।

9. शून्यता का? पाठ्यग्रन्थदिशा लिखत।
10. लोक: कतिविध:? पाठ्यग्रन्थदिशा नामानि लिखत।
11. 'पारमिता' शब्दस्य कोऽभिप्राय:?

**अथवा**

बोधिचित्त: कतिविध:? नामानि लिखत।

12. "इमं परिकरं सर्वं प्रज्ञार्थं हि मुनिर्जगौ" इत्यत्र परिकरशब्देन केषामवबोध: जायते?

13. प्रज्ञा कतिविधा? नामानि लिखत।

14. माध्यमिकनये प्रत्यक्षप्रमाणस्य परमार्थतः सिद्धि सम्भवति न वा? सूचयत।

15. 'सर्वे भावाः निःस्वाना' इत्यनेन निःस्वभावताया सांवृत्तिकी सिद्धिः जायते पारमार्थिकी वा? लिखत।

**अथवा**

प्रज्ञा का? पज्ञापारमितायाः उत्पादात् का उपलब्धिः संभवति?

**ख. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. स्वस्मृत्या पाठ्यग्रन्थात् कारिकामेकां विलिख्य तस्याः सप्रसंगं व्याख्यां कुरुत।

17. सप्रसंगं व्याख्या विधेया –

संवृत्तिः परमार्थश्च सत्यद्वयमिदं मतम्।

बुद्धेरगोचरस्तत्त्वं बुद्धिः संवृतिरुच्यते॥

18. सम्यग्तया व्याख्यायत –

लोकावतारणार्थं च भावा नाथेन देशिताः।

तत्त्वतः क्षणिका नैते संवृत्या चेद्विरुध्यते॥

**अथवा**

दृश्यते स्पृश्यते चापि स्वप्नमायोपमात्मना।

चित्तेन सहजातत्वाद् वेदना तेन नेक्ष्यते॥

19. सप्रसंगं व्याख्येयम् –

यावत्प्रत्ययसामग्री तावन्मायापि वर्तते।

दीर्घसन्तानमात्रेण कथं सत्त्वोऽस्ति सत्यतः॥

**अथवा**

यावत्प्रत्ययसामग्री तावत् कायः पुमानिव।

एवं करादौ सा यावत् तावत् कायोऽत्र दृश्यते॥

20. व्याख्या कुरुत –

मन्त्रादीनामसामर्थ्यान्न मायाचित्तसम्भवः ?

सापि नानाविधा माया नानाप्रत्ययसम्भवा॥

**अथवा**

चिन्तामणिः कल्पतरुर्यथेच्छापरिपूरणः।

विनेयपणिधानाभ्यां जिनबिम्बं तथेक्ष्यते॥

**ग. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. महायानसाहित्यस्य विकासे आचार्यशान्तिदेवस्य योगदानं सविसतरं प्रतिपादयत।

**अथवा**

माध्यमिकदर्शनस्य वैशिष्ट्यं प्रतिपादयत।

# A-II/5/2399/23

## चतुर्थसत्रार्द्धम्

## पञ्चमपत्रम्

## बौद्धदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**क. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. निर्वाणं कतिविधम्? नामानि लिखत।
2. शिक्षासमुच्चयस्य लेखकः कः?
3. सिद्धार्थस्य पितुः नाम लिखत।
4. कति ब्रह्मविहाराः? नामानि लिखत।

**अथवा**

अविद्या निरोधात् के निरुध्यन्ते? प्रतीत्यसमुत्पाददिशा सूचयत।

5. तत्त्वसंग्रहकारः कः?
6. विज्ञप्तिमात्रतासिद्धिकारः कः? तस्य अपरस्य ग्रन्थस्य नाम लिखत।
7. शून्यतासप्ततिकारः कः? तस्य अपरस्य ग्रन्थस्य नाम लिखत।

**अथवा**

तृतीयम् आर्याष्टाङ्गिकं मार्गं किम्? लिखत।

8. प्रथमं धर्मचक्रप्रवर्तनं कुत्र सञ्जातम्? सूचयत।

**अथवा**

धम्मपदं कस्य निकायस्य ग्रन्थोऽस्ति?

9. अभिधम्मपिटके कति ग्रन्थाः? नामानि लिखत।
10. कति विज्ञानानि? कानि च तानि?
11. कति पारमिताः? नामानि लिखत।
12. बौद्धनये रत्नत्रयेण कस्यावबोधः जायते? सूचयत।

13. महायाने सत्यं कतिविधम्? नामानि लिखत।

14. निर्वाणं किम्?

**अथवा**

प्रमाणं किम्? लिखत।

15. प्रत्यक्षं कतिविधम्? सूचयत।

**अथवा**

कति वैपुल्यसूत्राणि? सूचयत।

**ख. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. प्रतीत्यसमुत्पादस्य वर्णनं कुरुत।

17. चत्वार्यार्यसत्यानि कानि? सम्यग्तया प्रतिपादयत।

**अथवा**

प्रथमसङ्गीतेः परिचयो देयः।

18. धम्मपदग्रन्थस्य महत्त्वं प्रतिपादयत।

**अथवा**

अष्टादशधातवः के? प्रतिपादयत।

19. विज्ञानवादस्य कोऽर्थः? बौद्धदिशा प्रतिपादयत।

**अथवा**

खुद्दकनिकायस्य परिचयो देयः।

20. स्वस्मृत्या एकां कारिकां विलिख्य तस्याः सम्यग्तया व्याख्यां कुरुत।

**ग. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. शून्यवादः कः? निबन्धमेकं लिखत।

**अथवा**

त्रिपिटकसाहित्यस्य परिचयपूर्वकं पालिवाङ्मयस्य वैशिष्ट्यं लिखत।